# Shri Ramanamaharshi Sahasranamavali

# શ્રીરમણમહર્ષિસહસ્રનામાવલિઃ

## Document Information

Text title : Shri Ramana Sahasranamavali

File name : ramaNasahasranAmAvalI.itx

Category : sahasranAmAvalI, deities_misc, ramaNa-maharShi, nAmAvalI, jagadIsha-shAstrI, gurudev

Location : doc_deities_misc

Author : Jagadisha Sastri

Transliterated by : Sunder Hattangadi

Proofread by : Lingeshwara Rao (from original in Telugu) Sunder Hattangadi

Source : ISBN 81-85378-60-6

Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org

Latest update : March 31, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીરમણમહર્ષિસહસ્રનામાવલિઃ

દેવ્યુવાચ -
ભગવન્સર્વશાસ્ત્રાર્થપરિજ્ઞાનવતાં વર ।
અરુણેશસ્ય માહાત્મ્યં ત્વત્તો વિસ્તરશઃ શ્રુતમ્ ॥ ૧॥

તન્નામ્નામપિ સાહસ્રં સર્વપાહરં નૃણામ્ ।
અરુણેશાવતારસ્ય રમણસ્ય મહાત્મનઃ ॥ ૨॥

ઇદાનીં શ્રોતુમિચ્છામિ તસ્ય નામસહસ્રકમ્ ।
યસ્ય સઙ્કીર્તનાન્મર્ત્યો વિમુક્તિં વિન્દતે ધ્રુવમ્ ॥ ૩॥

ત્વં તુ સર્વં વિજાનાસિ નાન્યસ્ત્વત્તોઽસ્ય વેદિતા ।
તસ્માત્કારુણ્યતો મહ્યં ભક્તિમત્યૈ વિશેષતઃ ॥ ૪॥

નામ્નાં સહસ્રં દિવ્યાનાં રમણસ્ય મુનીશિતુઃ ।
રહસ્યમપિ વક્તવ્યં ત્વયા ગૌતમ સુવ્રત ॥ ૫॥

ગૌતમ ઉવાચ -
સાધુ સાધુ મહાભાગે પ્રશ્ન એષ જગદ્ધિતઃ ।
વક્ષ્યે તચ્છ્રદ્ધયોપેતા સાવધાનમનાઃ શ◌ૃણુ ॥ ૬॥

જ્ઞાનં વેદાન્તસઞ્જાતં સાક્ષાન્મોક્ષસ્ય સાધનમ્ ।
કર્મોપાસ્ત્યાદિ તદ્ભિન્નં જ્ઞાનદ્વારૈવ મુક્તિદમ્ ॥ ૭॥

નિષ્કામકર્મશુદ્ધાનાં વિવેકાદિમતાં નૃણામ્ ।
જાયતે તચ્ચ વિજ્ઞાનં પ્રસાદાદેવ સદ્ગુરોઃ ॥ ૮॥

જ્ઞાનસાધનનિષ્ઠત્વં જ્ઞાનાભ્યાસં વિદુર્બુધાઃ ।
તારતમ્યેન ભિદ્યન્તે જ્ઞાનાભ્યાસાધિકારિણઃ ॥ ૯॥

વિચારમાત્રનિષ્ઠસ્ય મુખ્યા જ્ઞાનાધિકારિતા ।
વિચારી દુર્લભો લોકે વિચારો દુષ્કરો યતઃ ॥ ૧૦॥

મુમુક્ષવો નરાસ્સર્વે જ્ઞાનાભ્યાસેઽધિકારિણઃ ।
સ્ત્રીશૂદ્રાણાં તથાન્યેષાં નાધિકારો વિગર્હિતઃ ॥ ૧૧॥

દેશભાષાન્તરેણાપિ તેષાં સોપ્યુપકારકઃ ।
જ્ઞાનસ્ય ચ વિચારોઽયં સન્નિકૃષ્ટં હિ સાધનમ્ ॥ ૧૨॥

વિચારભિન્નમાર્ગશ્ચ ન સાક્ષાજ્જ્ઞાનસિદ્ધયે ।
વિચારજનનદ્વારેત્યાહુર્વેદાન્તવેદિનઃ ॥ ૧૩॥

યોગોપાસ્ત્યાદયોપ્યન્યે સન્તિ વિજ્ઞાનહેતવઃ ।
તદાલમ્બો ભવત્યેવ વિચારાનધિકારિણામ્ ॥ ૧૪॥

યોગોપાસ્ત્યાદ્યશક્તાનાં જપસ્તુત્યાદિકીર્તનમ્ ।
જ્ઞાનોપાયોભવત્યેવ જિજ્ઞાસાનિષ્ઠિતં યદિ ॥ ૧૫॥

તસ્માદયત્નતોજ્ઞાનં સર્વેષાં યેન હેતુના ।
તાદૃશં નામસાહસ્રં રમણસ્ય મહાત્મનઃ ॥ ૧૬॥

ત્વયિ પ્રીત્યૈવ વક્ષ્યામિ હિતાય જગતાં શૃણુ ।
નાભક્તાય પ્રદાતવ્યમિદં મોક્ષસુખપ્રદમ્ ॥ ૧૭॥

અસ્ય શ્રીરમણદિવ્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય ।
ગૌતમો ઋષિઃ । અનુષ્ટુપ્છન્દઃ । શ્રીરમણપરમાત્માદેવતા ।
ઐં બીજમ્ । હ્રીં શક્તિઃ । શ્રીં કીલકમ્ ।
“શ્રીરમણાય નમઃ” ઇતિ મન્ત્રપ્રત્યેકવર્ણેન હૃદયાદિ ન્યાસઃ ।
ૐ ભૂર્ભુવસ્સ્વરોમિતિ દિગ્બન્ધઃ ।

ધ્યાનમ્

ધ્યાયેચ્છારદચન્દ્રસુન્દરમુખં તામ્રારવિન્દેક્ષણં
ભક્તાભીષ્ટવરાભયપ્રદકરં કૌપીનમાત્રોજ્જ્વલમ્ ।
સ્વાત્માનન્દરસાનુભૂતિવિવશં સર્વાનવદ્યાઙ્ગકં
શ્રીમન્તં રમણેશ્વરં ગુરુવરં યોગાસનાધ્યાસિતમ્ ॥

અરુણજલજનેત્રં મુગ્ધમન્દસ્મિતાસ્યં
    તરુણતપનભાસં પૂર્ણબોધપ્રસાદમ્ ।
અરુણશિખરિસાનુપ્રાઙ્ગણે સઞ્ચરન્તં
    રમણમરુણમૂર્તિં ચિન્તયેદિષ્ટસિદ્ધ્યૈ ॥

ૐ અરુણેશમહાશક્તિનિપાતપ્રતિબોધિતાય નમઃ ।

ૐ અચિન્ત્યપરનિર્વાણસ્થિતયે નમઃ ।

ૐ અવ્યક્તશક્તિકાય નમઃ ।

ૐ અનભ્યાસશ્રમાવાપ્તસમસ્તનિગમાગમાય નમઃ ।

ૐ અરુણાચલનાથીય પઞ્ચરત્નપ્રકાશકાય નમઃ ।

ૐ અનાહતાન્યહૃદયસ્થાનબોધનપણ્ડિતાય નમઃ ।

ૐ અકારાદિક્ષકારાન્તમાતૃકામન્ત્રમાલિકાય નમઃ ।

ૐ અન્તર્ગતમહાશક્તયે નમઃ ।

ૐ અણિમાદિગુણાન્વિતાય નમઃ ।

ૐ અભ્યાસાતિશયજ્ઞાતાય નમઃ ॥

ૐ અત્યાશ્ચર્યચરિત્રકાય નમઃ ।

ૐ અતિવર્ણાશ્રમાચારાય નમઃ ।

ૐ અચિન્ત્યશક્તયે નમઃ ।

ૐ અમોઘદૃશે નમઃ ।

ૐ અઙ્ગાવન્ત્યાદિદેશીય મુમુક્ષુજનતાશ્રયાય નમઃ ।

ૐ અન્તર્મુખાય નમઃ ।

ૐ અન્તરારામાય નમઃ ।

ૐ અન્તર્યામિને નમઃ ।

ૐ અહમર્થદૃશે નમઃ ।

ૐ અહમર્થૈકલક્ષ્યાર્થાય નમઃ ॥

ૐ અરુણાદ્રિમયાય નમઃ ।

ૐ અરુણાય નમઃ ।

ૐ અપીતામ્બાઙ્ગનિર્માલ્યપયઃપાનૈકજીવિતાય નમઃ ।

ૐ અધ્યાત્મયોગનિલયાય નમઃ ।

ૐ અદીનાત્મને નમઃ ।

ૐ અઘમર્ષણાય નમઃ ।

ૐ અકાયાય નમઃ ।

ૐ ભક્તકાયસ્થાય નમઃ ।

ૐ કાલચક્રપ્રવર્તકાય નમઃ ।

ૐ અક્ષિપેયામૃતામ્બોધયે નમઃ ॥

ૐ આહૂયૈશ્વર્યદાયકાય નમઃ ।

ૐ આજાનુબાહવે નમઃ ।

ૐ અક્ષોભ્યાય નમઃ ।
ૐ આત્મવતે નમઃ ।
ૐ અનસૂયકાય નમઃ ।
ૐ આવર્તક્ષેત્રસઞ્જાતાય નમઃ ।
ૐ આર્તરક્ષણતત્પરાય નમઃ ।
ૐ ઇતિહાસપુરાણજ્ઞાય નમઃ ।
ૐ ઇષ્ટાપૂર્તફલપ્રદાય નમઃ ।
ૐ ઇડાપિઙ્ગલિકામધ્યસુષુમ્નાગ્રન્થિભેદકાય નમઃ ॥

ૐ ઇડાપિઙ્ગલિકામધ્યસુષુમ્નામધ્યભાસુરાય નમઃ ।
ૐ ઇષ્ટાર્થદાનનિપુણાય નમઃ ।
ૐ ઇન્દ્રભોગવિરક્તધિયે નમઃ ।
ૐ ઈશાનાય નમઃ ।
ૐ ઈષણાહીનાય નમઃ ।
ૐ ઈતિબાધાભયાપહાય નમઃ ।
ૐ ઉપાસ્યમૂર્તયે નમઃ ।
ૐ ઉત્સાહસમ્પન્નાય નમઃ ।
ૐ ઉરુવિક્રમાય નમઃ ।
ૐ ઉદાસીનવદાસીનાય નમઃ ॥ ૫૦
ૐ ઉત્તમજ્ઞાનદેશિકાય નમઃ ।
ૐ ઊર્ધ્વરેતસે નમઃ ।
ૐ ઊર્ધ્વગતયે નમઃ ।
ૐ ઉટજસ્થાય નમઃ ।
ૐ ઉદારધિયે નમઃ ।
ૐ ઋષયે નમઃ ।
ૐ ઋષિગણસ્તુત્યાય નમઃ ।
ૐ ઋજુબુદ્ધયે નમઃ ।
ૐ ઋજુપ્રિયાય નમઃ ।
ૐ ઋતમ્ભરાય નમઃ ॥

ૐ ઋતપ્રજ્ઞાય નમઃ ।
ૐ ઋજુમાર્ગપ્રદર્શકાય નમઃ ।
ૐ એવમિત્યવિનિર્ણેયાય નમઃ ।

ૐ એનઃકૂટવિનાશનાય નમઃ ।
ૐ ઐશ્વર્યદાનનિપુણાય નમઃ ।
ૐ ઔદાર્યગુણમણ્ડિતાય નમઃ ।
ૐ ઓઙ્કારપદલક્ષ્યાર્થાય નમઃ ।
ૐ ઔપમ્યપરિવર્જિતાય નમઃ ।
ૐ કટાક્ષસ્યન્દિકરુણાય નમઃ ।
ૐ કટિબદ્ધાલમલ્લકાય નમઃ ॥

ૐ કમનીયચરિત્રાઢ્યાય નમઃ ।
ૐ કર્મવિદે નમઃ ।
ૐ કવિપુઙ્ગવાય નમઃ ।
ૐ કર્માકર્મવિભાગજ્ઞાય નમઃ ।
ૐ કર્મલેપવિવર્જિતાય નમઃ ।
ૐ કલિદોષહરાય નમઃ ।
ૐ કમ્રાય નમઃ ।
ૐ કર્મયોગપ્રવર્તકાય નમઃ ।
ૐ કર્મન્દિપ્રવરાય નમઃ ।
ૐ કલ્યાય નમઃ ॥

ૐ કલ્યાણગુણમણ્ડિતાય નમઃ ।
ૐ કાન્તિપત્તનસન્દૃષ્ટારુણજ્યોતિઃપ્રહર્ષિતાય નમઃ ।
ૐ કામહન્ત્રે નમઃ ।
ૐ કાન્તમૂર્તયે નમઃ ।
ૐ કાલાત્મને નમઃ ।
ૐ કાલસૂત્રહૃતે નમઃ ।
ૐ કાઙ્ક્ષાહીનાય નમઃ ।
ૐ કાલકાઙ્ક્ષિણે નમઃ ।
ૐ કાશીવાસફલપ્રદાય નમઃ ।
ૐ કાશ્મીરદેશ્યસેવ્યાઙ્ઘ્રયે નમઃ ॥

ૐ નેપાલીયસમર્ચિતાય નમઃ ।
ૐ કામકારનિરાકર્ત્રે નમઃ ।
ૐ કૃતકૃત્યત્વકારકાય નમઃ ।
ૐ કાવ્યકણ્ઠસુધીદૃષ્ટ કાર્તિકેયસ્વરૂપધૃતે નમઃ ।

ॐ કિઙ્કરીકૃત ભૂપાલાય નમઃ ।
ॐ કીર્તિમતે નમઃ ।
ॐ કીર્તિવર્ધનાય નમઃ ।
ॐ કુમારાય નમઃ ।
ॐ કુતલામોદાય નમઃ ।
ॐ કુકુટુમ્બિને નમઃ ॥ ૧૦૦
ॐ કુલોદ્ભૂતાય નમઃ ।
ॐ કુષ્ઠાપસ્મારરોગઘ્નાય નમઃ ।
ॐ કુસુમારામનિષ્ઠિતાય નમઃ ।
ॐ કૃપાળવે નમઃ ।
ॐ કૃપણાલમ્બાય નમઃ ।
ॐ કૃશાનુસદૃશાય નમઃ ।
ॐ કૃશાય નમઃ ।
ॐ કેરલાન્ધ્રાદિભાષજ્ઞાય નમઃ ।
ॐ કેરલાન્ધ્રજનેડિતાય નમઃ ।
ॐ કૈવલ્યપદનિશ્રેણયે નમઃ ॥

ॐ કૈવલ્યસુખદાયકાય નમઃ ।
ॐ કોઽહં નાહં સોઽહમિતિ સ્વાત્માન્વેષણમાર્ગદૃશે નમઃ ।
ॐ કોઽહંવિમર્શબ્રહ્માસ્ત્રનાશિતાશેષવિભ્રમાય નમઃ ।
ॐ કોશાલયપ્રતિષ્ઠાત્રે નમઃ ।
ॐ કોશવતે નમઃ ।
ॐ કોશવીક્ષિત્રે નમઃ ।
ॐ ક્ષમાવતે નમઃ ।
ॐ ક્ષિપ્રસન્તુષ્ટાય નમઃ ।
ॐ ક્ષપિતાશેષકલ્મષાય નમઃ ।
ॐ ક્ષતકર્મણે નમઃ ॥

ॐ ક્ષતવિદ્યાય નમઃ ।
ॐ ક્ષીણભક્તજનાવનાય નમઃ ।
ॐ ક્ષામનાશિને નમઃ ।
ॐ ક્ષુધાહીનાય નમઃ ।
ॐ ક્ષુદ્રઘ્નાય નમઃ ।

ૐ ક્ષિતિમણ્ડનાય નમઃ ।
ૐ ક્ષેત્રજ્ઞાય નમઃ ।
ૐ ક્ષેમદાય નમઃ ।
ૐ ક્ષેમાય નમઃ ।
ૐ ક્ષેમાર્થિજનવન્દિતાય નમઃ ॥

ૐ ક્ષેત્રાટનપરિશ્રાન્તભક્તક્ષિપ્રપ્રસાદનાય નમઃ ।
ૐ ક્ષ્રૌં મન્ત્રબીજતત્ત્વજ્ઞાય નમઃ ।
ૐ ક્ષેત્રાજીવફલપ્રદાય નમઃ ।
ૐ ગમ્ભીરાય નમઃ ।
ૐ ગર્વિતાય નમઃ ।
ૐ ગર્વવિહીનાય નમઃ ।
ૐ ગર્વનાશનાય નમઃ ।
ૐ ગદ્યપદ્યપ્રિયાય નમઃ ।
ૐ ગમ્યાય નમઃ ।
ૐ ગાયત્રીમન્ત્રબોધિતાય નમઃ ॥

ૐ ગિરીશાય નમઃ ।
ૐ ગીષ્પતયે નમઃ ।
ૐ ગુણ્યાય નમઃ ।
ૐ ગુણાતીતાય નમઃ ।
ૐ ગુણાકરાય નમઃ ।
ૐ ગૃહિણે નમઃ ।
ૐ ગૃહવિનિર્મુક્તાય નમઃ ।
ૐ ગ્રહાતિગ્રહસઞ્જયિને નમઃ ।
ૐ ગીતોપદેશસારાદિ ગ્રન્થકૃતે નમઃ ।
ૐ ગ્રન્થિભેદકાય નમઃ ॥ ૧૫૦
ૐ ગુરુમૂર્તતપોનિષ્ઠાય નમઃ ।
ૐ નૈસર્ગિકસુહૃદ્વરાય નમઃ ।
ૐ ગૃહિમુક્ત્યધિકારિત્વવ્યવસ્થાપનતત્પરાય નમઃ ।
ૐ ગોવિન્દાય નમઃ ।
ૐ ગોકુલત્રાત્રે નમઃ ।
ૐ ગોષ્ઠીવતે નમઃ ।

ॐ ગોધનાન્વિતાય નમઃ ।
ॐ ચરાચરહિતાય નમઃ ।
ॐ ચક્ષુરુત્સવાય નમઃ ।
ॐ ચતુરાય નમઃ ॥

ॐ ચલાય નમઃ ।
ॐ ચતુર્વર્ગચતુર્ભદ્રપ્રદાય નમઃ ।
ॐ ચરમદેહભૃતે નમઃ ।
ॐ ચાણ્ડાલચટકશ્વાહિકિટિકીશહિતઙ્કરાય નમઃ ।
ॐ ચિત્તાનુવર્તિને નમઃ ।
ॐ ચિન્મુદ્રિણે નમઃ ।
ॐ ચિન્મયાય નમઃ ।
ॐ ચિત્તનાશકાય નમઃ ।
ॐ ચિરન્તનાય નમઃ ।
ॐ ચિદાકાશાય નમઃ ॥

ॐ ચિન્તાહીનાય નમઃ ।
ॐ ચિદૂર્જિતાય નમઃ ।
ॐ ચોરહણે નમઃ ।
ॐ ચોરદૃશે નમઃ ।
ॐ ચોરચપેટાઘાતનન્દિતાય નમઃ ।
ॐ છલચ્છદ્મવચોહીનાય નમઃ ।
ॐ શત્રુજિતે નમઃ ।
ॐ શત્રુતાપનાય નમઃ ।
ॐ છન્નાકારાય નમઃ ।
ॐ છાન્દસેડ્યાય નમઃ ।
ॐ છિન્નકર્માદિ બન્ધનાય નમઃ ।
ॐ છિન્નદ્વૈધાય નમઃ ।
ॐ છિન્નમોહાય નમઃ ।
ॐ છિન્નહૃદે નમઃ ।
ॐ છિન્નકલ્મષાય નમઃ ।
ॐ જગદ્ગુરવે નમઃ ।
ॐ જગત્પ્રાણાય નમઃ ।

ૐ જગદીશાય નમઃ ।

ૐ જગત્પ્રિયાય નમઃ ।

ૐ જયન્તીજાય નમઃ ।

ૐ જન્મહીનાય નમઃ ।

ૐ જયદાય નમઃ ।

ૐ જનમોહનાય નમઃ ।

ૐ જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ સાક્ષિણે નમઃ ।

ૐ જાડ્યવિનાશકાય નમઃ ।

ૐ જાતિવર્ણભિદાશૂન્યાય નમઃ ।

ૐ જિતાત્મને નમઃ ।

ૐ જિતભૂતકાય નમઃ ।

ૐ જિતેન્દ્રિયાય નમઃ ।

ૐ જિતપ્રાણાય નમઃ ॥ ૨૦૦

ૐ જિતાન્તઃશત્રુસઞ્ચયાય નમઃ ।

ૐ જીવબ્રહ્મૈક્યવિદે નમઃ ।

ૐ જીવન્મુક્તાય નમઃ ।

ૐ જીવત્વનાશકાય નમઃ ।

ૐ જ્યોતિર્લિઙ્ગમયજ્યોતિષે નમઃ ।

ૐ સમલોષ્ટાશ્મકાઞ્ચનાય નમઃ ।

ૐ જેત્રે નમઃ ।

ૐ જ્યાયસે નમઃ ।

ૐ જ્ઞાનમૂર્તયે નમઃ ।

ૐ જ્ઞાનિને નમઃ ॥

ૐ જ્ઞાનમહાનિધયે નમઃ ।

ૐ જ્ઞાનજ્ઞાતૃજ્ઞેયરૂપત્રિપુટી ભાવનોજ્ઝિતાય નમઃ ।

ૐ જ્ઞાતસર્વાગમાય નમઃ ।

ૐ જ્ઞાનગમ્યાય નમઃ ।

ૐ જ્ઞાતેયસન્નુતાય નમઃ ।

ૐ જ્ઞાનવિજ્ઞાનતૃપ્તાત્મને નમઃ ।

ૐ જ્ઞાનસઞ્છિન્નસંશયાય નમઃ ।

ૐ જ્ઞાનાગ્નિદગ્ધકર્મણે નમઃ ।

ૐ જ્ઞાનોપાયપ્રદર્શકાય નમઃ ।
ૐ જ્ઞાનયજ્ઞવિધિપ્રીતાય નમઃ ॥

ૐ જ્ઞાનાવસ્થિતમાનસાય નમઃ ।
ૐ જ્ઞાતાઽજ્ઞાતાન્યચિન્માત્રાય નમઃ ।
ૐ જ્ઞાનવૃદ્ધોપલાલિતાય નમઃ ।
ૐ તત્ત્વજ્ઞાય નમઃ ।
ૐ તત્ત્વવિન્નેત્રે નમઃ ।
ૐ તત્ત્વમસ્યાદિલક્ષિતાય નમઃ ।
ૐ તત્ત્વભાષણસન્તુષ્ટાય નમઃ ।
ૐ તત્ત્વબોધકદેશિકાય નમઃ ।
ૐ તત્પદાર્થૈકસંલીનાય નમઃ ।
ૐ તત્ત્વાન્વેષણતત્પરાય નમઃ ॥

ૐ તપનાય નમઃ ।
ૐ તપનીયાઙ્ગાય નમઃ ।
ૐ તમસ્સન્તાપચન્દ્રમસે નમઃ ।
ૐ તપસ્વિને નમઃ ।
ૐ તાપસારાધ્યાય નમઃ ।
ૐ તપઃક્લિષ્ટતનૂદ્વહાય નમઃ ।
ૐ તપસ્તત્ત્વાર્થસારજ્ઞાય નમઃ ।
ૐ તપોમૂર્તયે નમઃ ।
ૐ તપોમયાય નમઃ ।
ૐ તપોબલસમાકૃષ્ટ ભક્તસઙ્ઘસમાવૃતાય નમઃ ॥

ૐ તાપત્રયાગ્નિસન્તપ્ત જનસઞ્જીવનામૃતાય નમઃ ।
ૐ તાતાદેશાપ્તશોણાદ્રયે નમઃ ।
ૐ તાતારુણમહેશ્વરાય નમઃ ।
ૐ તાતાન્તિકસમાગન્ત્રે નમઃ ।
ૐ તાતાન્વેષણતત્પરાય નમઃ ।
ૐ તિતિક્ષવે નમઃ ।
ૐ તીર્થવિદે નમઃ ।
ૐ તીર્થાય નમઃ ।
ૐ તુરીયાય નમઃ ।

ૐ તુષ્ટમાનસાય નમઃ ॥ ૨૫૦
ૐ તુલ્યનિન્દાસ્તુતયે નમઃ ।
ૐ તૂષ્ણીંશીલાય નમઃ ।
ૐ તૃષ્ણાવિવર્જિતાય નમઃ ।
ૐ તેજસ્વિને નમઃ ।
ૐ ત્યક્તવિષયાય નમઃ ।
ૐ ત્રયીભાવાર્થકોવિદાય નમઃ ।
ૐ ત્રિદિવેશમુખોપાસ્યાય નમઃ ।
ૐ ત્રિવર્ગાય નમઃ ।
ૐ ત્રિગુણાત્મકાય નમઃ ।
ૐ ત્રૈલોક્યબુધસમ્પૂજ્યાય નમઃ ॥

ૐ ત્રૈલોક્યગ્રાસબૃંહિતાય નમઃ ।
ૐ ત્રૈલોક્યસૃષ્ટિસ્થિતિકૃતે નમઃ ।
ૐ ત્રૈગુણ્યવિષયોજ્ઝિતાય નમઃ ।
ૐ ત્રૈગુણ્યવિષવેગઘ્નાય નમઃ ।
ૐ દક્ષાય નમઃ ।
ૐ દગ્ધવપુર્ધરાય નમઃ ।
ૐ દર્શનીયાય નમઃ ।
ૐ દયામૂર્તયે નમઃ ।
ૐ દક્ષિણાસ્યાય નમઃ ।
ૐ દમાન્વિતાય નમઃ ।
ૐ દણ્ડધૃતે નમઃ ।
ૐ દણ્ડનીતિસ્થાય નમઃ ।
ૐ દક્ષિણાય નમઃ ।
ૐ દમ્ભવર્જિતાય નમઃ ।
ૐ દહરાકાશમધ્યસ્થ ચિદાકાશપ્રતિષ્ઠિતાય નમઃ ।
ૐ દશદિક્પાલસમ્પૂજ્યાય નમઃ ।
ૐ દશદિગ્વ્યાપિસદ્યશસે નમઃ ।
ૐ દક્ષિણદ્વીપવિખ્યાતાય નમઃ ।
ૐ દાક્ષિણાત્યકલાકવયે નમઃ ।
ૐ દારિદ્ર્યધ્વંસકાય નમઃ ॥

ૐ દાન્તાય નમઃ ।
ૐ દારિતક્લેશસન્તતયે નમઃ ।
ૐ દાસીદાસભરાય નમઃ ।
ૐ દિવ્યાય નમઃ ।
ૐ દિષ્ટ્યાબુદ્ધાય નમઃ ।
ૐ દિગમ્બરાય નમઃ ।
ૐ દીર્ઘદર્શિને નમઃ ।
ૐ દીપ્યમાનાય નમઃ ।
ૐ દીનબન્ધવે નમઃ ।
ૐ દૃગાત્મકાય નમઃ ॥

ૐ દૃગ્દૃશ્યભેદધીશૂન્યાય નમઃ ।
ૐ દર્શનાય નમઃ ।
ૐ દૃપ્તખણ્ડકાય નમઃ ।
ૐ દેવવન્દ્યાય નમઃ ।
ૐ દેવતેશાય નમઃ ।
ૐ દોષજ્ઞાય નમઃ ।
ૐ દોષ નાશનાય નમઃ ।
ૐ દ્વાદશાર્ણમનુધ્યેયાય નમઃ ।
ૐ દ્વાદશાન્તસ્થલસ્થિતાય નમઃ ।
ૐ દુર્વિગાહ્યાય નમઃ ॥ ૩૦૦
ૐ દુરાધર્ષાય નમઃ ।
ૐ દુરાચારનિવર્તકાય નમઃ ।
ૐ દૈવિકાય નમઃ ।
ૐ દ્રાવિડાય નમઃ ।
ૐ દ્વીપાન્તરવિખ્યાતવૈભવાય નમઃ ।
ૐ દ્વિતીયાતિથિસમ્ભૂતાય નમઃ ।
ૐ દ્વૈતભાવવિમુક્તધિયે નમઃ ।
ૐ દ્વૈતાદ્વૈતમતાતીતાય નમઃ ।
ૐ દ્વૈતસન્તમસાપહાય નમઃ ।
ૐ ધનદાય નમઃ ॥

ૐ ધર્મસૂક્ષ્મજ્ઞાય નમઃ ।

ૐ ધર્મરાજે નમઃ ।

ૐ ધાર્મિકપ્રિયાય નમઃ ।

ૐ ધાત્રે નમઃ ।

ૐ ધાતૃસમસ્રીકાય નમઃ ।

ૐ ધાતુશુદ્ધિવિધાયકાય નમઃ ।

ૐ ધારણાશક્તિમતે નમઃ ।

ૐ ધીરાય નમઃ ।

ૐ ધુરીણાય નમઃ ।

ૐ ધૃતિવર્ધનાય નમઃ ॥

ૐ ધીરોદાત્તગુણોપેતાય નમઃ ।

ૐ ધ્યાનનિષ્ઠાય નમઃ ।

ૐ ધ્રુવસ્મૃતયે નમઃ ।

ૐ નમજ્જનોદ્ધારણકૃતે નમઃ ।

ૐ નરવાહનસન્નિભાય નમઃ ।

ૐ નવનીતસમસ્વાન્તાય નમઃ ।

ૐ નતસાધુજનાશ્રયાય નમઃ ।

ૐ નરનારીગણોપેતાય નમઃ ।

ૐ નગસાનુકૃતાશ્રમાય નમઃ ।

ૐ નમમેત્યવ્યયયુતાય નમઃ ॥

ૐ નવીનાય નમઃ ।

ૐ નષ્ટમાનસાય નમઃ ।

ૐ નયનાનન્દદાય નમઃ ।

ૐ નમ્યાય નમઃ ।

ૐ નામોચ્ચારણમુક્તિદાય નમઃ ।

ૐ નાગસ્વામ્યનુજાય નમઃ ।

ૐ નાગસુન્દરજ્યેષ્ઠતાઙ્ગતાય નમઃ ।

ૐ નાદબિન્દુકલાભિજ્ઞાય નમઃ ।

ૐ નાદબ્રહ્મપ્રતિષ્ઠિતાય નમઃ ।

ૐ નાદપ્રિયાય નમઃ ॥

ૐ નારદાદિપૂજ્યાય નમઃ ।

ૐ નામવિવર્જિતાય નમઃ ।

ॐ નામિને નમઃ ।
ॐ નામજપપ્રીતાય નમઃ ।
ॐ નાસ્તિકત્વવિઘાતકૃતે નમઃ ।
ॐ નાસાગ્રન્યસ્તદૃશે નમઃ ।
ॐ નામબ્રહ્માતીતાય નમઃ ।
ॐ નિરઞ્જનાય નમઃ ।
ॐ નિરઞ્જનાશ્રયાય નમઃ ।
ॐ નિત્યતૃપ્તાય નમઃ ॥ ૩૫૦
ॐ નિઃશ્રેયસપ્રદાય નમઃ ।
ॐ નિર્યત્નસિદ્ધનિત્યશ્રિયે નમઃ ।
ॐ નિત્યસિદ્ધસ્વરૂપદૃશે નમઃ ।
ॐ નિર્મમાય નમઃ ।
ॐ નિરહઙ્કારાય નમઃ ।
ॐ નિરવદ્યાય નમઃ ।
ॐ નિરાશ્રયાય નમઃ ।
ॐ નિત્યાનન્દાય નમઃ ।
ॐ નિરાતઙ્કાય નમઃ ।
ॐ નિષ્પ્રપઞ્ચાય નમઃ ॥

ॐ નિરામયાય નમઃ ।
ॐ નિર્મલાય નમઃ ।
ॐ નિશ્ચલાય નમઃ ।
ॐ નિત્યાય નમઃ ।
ॐ નિર્મોહાય નમઃ ।
ॐ નિરુપાધિકાય નમઃ ।
ॐ નિસ્સઙ્ગાય નમઃ ।
ॐ નિગમસ્તુત્યાય નમઃ ।
ॐ નિરીહાય નમઃ ।
ॐ નિરુપપ્લવાય નમઃ ॥

ॐ નિત્યશુદ્ધાય નમઃ ।
ॐ નિત્યબુદ્ધાય નમઃ ।
ॐ નિત્યમુક્તાય નમઃ ।

ૐ નિરન્તરાય નમઃ ।
ૐ નિર્વિકારાય નમઃ ।
ૐ નિર્ગુણાત્મને નમઃ ।
ૐ નિષ્પાપાય નમઃ ।
ૐ નિષ્પરિગ્રહાય નમઃ ।
ૐ નિર્ભવાય નમઃ ।
ૐ નિસ્સ્તુતયે નમઃ ॥

ૐ નિદ્રાય નમઃ ।
ૐ નિજાનન્દૈકનિર્ભરાય નમઃ ।
ૐ નિગ્રહાનુગ્રહસમાય નમઃ ।
ૐ નિકૃતિજ્ઞાય નમઃ ।
ૐ નિદાનવિદે નમઃ ।
ૐ નિર્ગ્રન્થાય નમઃ ।
ૐ નિર્નમસ્કારાય નમઃ ।
ૐ નિસ્તુલયે નમઃ ।
ૐ નિરયાપહાય નમઃ ।
ૐ નિર્વાસનાય નમઃ ॥

ૐ નિર્વ્યસનાય નમઃ ।
ૐ નિર્યોગક્ષેમચિન્તનાય નમઃ ।
ૐ નિર્બીજધ્યાનસંવેદ્યાય નમઃ ।
ૐ નિર્વાદાય નમઃ ।
ૐ નિશ્શિરોરુહાય નમઃ ।
ૐ પઞ્ચાક્ષરમનુધ્યેયાય નમઃ ।
ૐ પઞ્ચપાતકનાશનાય નમઃ ।
ૐ પઞ્ચસ્કન્ધીમતાભિજ્ઞાય નમઃ ।
ૐ પઞ્ચકોશવિલક્ષણાય નમઃ ।
ૐ પઞ્ચાગ્નિવિદ્યામાર્ગજ્ઞાય નમઃ ॥ ૪૦૦
ૐ પઞ્ચકૃત્યપરાયણાય નમઃ ।
ૐ પઞ્ચવક્ત્રાય નમઃ ।
ૐ પઞ્ચતપસે નમઃ ।
ૐ પઞ્ચતાકારણોદ્ધરાય નમઃ ।

ૐ પઞ્ચોપચારસમ્પૂજ્યાય નમઃ ।
ૐ પઞ્ચભૂતવિમર્દનાય નમઃ ।
ૐ પઞ્ચવિંશતિતત્ત્વાત્મને નમઃ ।
ૐ મહાપઞ્ચદશાક્ષરાય નમઃ ।
ૐ પરાશરકુલોદ્ભૂતાય નમઃ ।
ૐ પણ્ડિતાય નમઃ ॥

ૐ પણ્ડિતપ્રિયાય નમઃ ।
ૐ પરમેષ્ઠિને નમઃ ।
ૐ પરેશાનાય નમઃ ।
ૐ પરિપૂર્ણાય નમઃ ।
ૐ પરાત્પરાય નમઃ ।
ૐ પરસ્મૈ જ્યોતિષે નમઃ ।
ૐ પરસ્મૈ ધામ્ને નમઃ ।
ૐ પરમાત્મને નમઃ ।
ૐ પરાયણાય નમઃ ।
ૐ પતિવ્રતાભીષ્ટદાયિને નમઃ ॥

ૐ પર્યઙ્કસ્થાય નમઃ ।
ૐ પરાર્થવિદે નમઃ ।
ૐ પવિત્રપાદાય નમઃ ।
ૐ પાપારયે નમઃ ।
ૐ પરાર્થૈકપ્રયોજનાય નમઃ ।
ૐ પાલીતીર્થતટોલ્લાસિને નમઃ ।
ૐ પાશ્ચાત્યદ્વીપવિશ્રુતાય નમઃ ।
ૐ પિત્રે નમઃ ।
ૐ પિતૃહિતાય નમઃ ।
ૐ પિત્તનાશકાય નમઃ ॥

ૐ પિતૃમોચકાય નમઃ ।
ૐ પિતૃવ્યાન્વેષિતાય નમઃ ।
ૐ પીનાય નમઃ ।
ૐ પાતાલેશાલયસ્થિતાય નમઃ ।
ૐ પુનર્વસૂદિતાય નમઃ ।

ૐ પુણ્યાય નમઃ ।

ૐ પુણ્યકૃતે નમઃ ।

ૐ પુરુષોત્તમાય નમઃ ।

ૐ પુન્નાગતરુવત્ક્ષેત્રિણે નમઃ ।

ૐ પુણ્યાપુણ્યવિવર્જિતાય નમઃ ॥

ૐ પૂતાત્મને નમઃ ।

ૐ પૃથુકપ્રીતાય નમઃ ।

ૐ પૃથુદાય નમઃ ।

ૐ પુરોહિતાય નમઃ ।

ૐ પ્રતિમાકૃતસાન્નિધ્યાય નમઃ ।

ૐ પ્રતિગ્રહપરાઙ્મુખાય નમઃ ।

ૐ પ્રમાદિવત્સરોદ્ભૂતાય નમઃ ।

ૐ પ્રકૃતિસ્થાય નમઃ ।

ૐ પ્રમાણવિદે નમઃ ।

ૐ પ્રતીકોપાસ્તિવિષયાય નમઃ ॥ ૪૫૦

ૐ પ્રત્યુત્તરવિચક્ષણાય નમઃ ।

ૐ પ્રતીચે નમઃ ।

ૐ પ્રશાન્તાય નમઃ ।

ૐ પ્રત્યક્ષાય નમઃ ।

ૐ પ્રશ્રિતાય નમઃ ।

ૐ પ્રતિભાનવતે નમઃ ।

ૐ પ્રદક્ષિણાપ્રીતમનસે નમઃ ।

ૐ પ્રવાલાદ્રિસમાશ્રયાય નમઃ ।

ૐ પ્રાચ્યપ્રતીચ્યદેશીયવિબુધાગ્રણ્યવન્દિતાય નમઃ ।

ૐ પ્રસ્થાનભેદસમ્બોદ્ધ્યાય નમઃ ॥

ૐ પ્રાંશવે નમઃ ।

ૐ પ્રાણરોધકાય નમઃ ।

ૐ પ્રસૂતિદિનવૃદ્ધસ્ત્રીદર્શિતજ્યોતિરાકૃતયે નમઃ ।

ૐ પ્રાર્થિતાર્થપ્રદાય નમઃ ।

ૐ પ્રાજ્ઞાય નમઃ ।

ૐ પ્રાવારકનિગૂહિતાય નમઃ ।

ૐ પ્રાતઃસ્મર્તવ્યચારિત્રાય નમઃ ।
ૐ પ્રાપ્તપ્રાપ્તવ્યનિર્વૃતાય નમઃ ।
ૐ પ્રાયણસ્મૃતિસમ્પ્રાપ્યાય નમઃ ।
ૐ પ્રિયહીનાય નમઃ ॥

ૐ પ્રિયંવદાય નમઃ ।
ૐ પ્રેક્ષાવતે નમઃ ।
ૐ પ્રેષ્યરહિતાય નમઃ ।
ૐ ફલભૂતાય નમઃ ।
ૐ ફલપ્રદાય નમઃ ।
ૐ બહુશ્રુતાય નમઃ ।
ૐ બહુમતાય નમઃ ।
ૐ બહુપાકિને નમઃ ।
ૐ બહુપ્રદાય નમઃ ।
ૐ બલવતે નમઃ ॥

ૐ બન્ધુમતે નમઃ ।
ૐ બાલરૂપાય નમઃ ।
ૐ બાલ્યવિચેષ્ટિતાય નમઃ ।
ૐ બાલભાનુપ્રતીકાશાય નમઃ ।
ૐ બાલસન્ન્યાસિશબ્દિતાય નમઃ ।
ૐ બ્રહ્મચર્યતપોયોગશ્રુતપ્રજ્ઞાસમન્વિતાય નમઃ ।
ૐ બ્રહ્મણ્યાય નમઃ ।
ૐ બ્રહ્મવિદે નમઃ ।
ૐ બ્રહ્મણે નમઃ ।
ૐ બ્રહ્મસાયુજ્યદાયકાય નમઃ ॥

ૐ બ્રહ્માર્પિતમનોબુદ્ધયે નમઃ ।
ૐ બ્રાહ્મણસ્વામિનામકાય નમઃ ।
ૐ બ્રહ્માસનસ્થિતાય નમઃ ।
ૐ બ્રહ્મસૂત્રવિદે નમઃ ।
ૐ ભગવતે નમઃ ।
ૐ ભવાય નમઃ ।
ૐ ભયકૃતે નમઃ ।

ૐ ભયસંહર્ત્રે નમઃ ।

ૐ ભવાદાય નમઃ ।

ૐ ભક્તભાવિતાય નમઃ ॥ ૫૦૦

ૐ ભારૂપાય નમઃ ।

ૐ ભાવનાગ્રાહ્યાય નમઃ ।

ૐ ભાવજ્ઞાય નમઃ ।

ૐ ભાગ્યવર્ધનાય નમઃ ।

ૐ ભારતીય મહાભાગ્યાય નમઃ ।

ૐ ભારતખ્યાતિપોષકાય નમઃ ।

ૐ ભારતોદ્યજ્જ્ઞાનદીપાય નમઃ ।

ૐ ભાવનાભેદકૃન્તનાય નમઃ ।

ૐ ભિદાશૂન્યાય નમઃ ।

ૐ ભિદાધ્વંસિને નમઃ ॥

ૐ ભાવુકાય નમઃ ।

ૐ ભિક્ષુકેશ્વરાય નમઃ ।

ૐ ભૂતિદાય નમઃ ।

ૐ ભૂતિકૃતે નમઃ ।

ૐ ભૂમિનાથપૂર્ણાંશસમ્ભવાય નમઃ ।

ૐ ભૌમબ્રહ્મણે નમઃ ।

ૐ ભ્રમધ્વંસિને નમઃ ।

ૐ ભૂહૃત્ક્ષેત્રલક્ષિતાય નમઃ ।

ૐ ભૂતિભૂષિત સર્વાઙ્ગાય નમઃ ।

ૐ મઙ્ગલાય નમઃ ॥

ૐ મઙ્ગલપ્રદાય નમઃ ।

ૐ મનસે નમઃ ।

ૐ બુદ્ધયે નમઃ ।

ૐ અહઙ્કારાય નમઃ ।

ૐ પ્રકૃતયે નમઃ ।

ૐ પરસ્મૈ પુંસે નમઃ ।

ૐ મહાશક્તયે નમઃ ।

ૐ મહાસિદ્ધયે નમઃ ।

ૐ મહોદારાય નમઃ ।
ૐ મહાધ્યુતયે નમઃ ॥

ૐ મહાકર્ત્રે નમઃ ।
ૐ મહાભોક્ત્રે નમઃ ।
ૐ મહાયોગિને નમઃ ।
ૐ મહામતયે નમઃ ।
ૐ મહામાન્યાય નમઃ ।
ૐ મહાભાગાય નમઃ ।
ૐ મહાસેનમહાંશજાય નમઃ ।
ૐ મર્યાદાકૃતે નમઃ ।
ૐ મહાદેવાય નમઃ ।
ૐ મહારૂપિણે નમઃ ॥

ૐ મહાયશસે નમઃ ।
ૐ મહોદ્યમાય નમઃ ।
ૐ મહોત્સાહાય નમઃ ।
ૐ મમતાગ્રહપીડનાય નમઃ ।
ૐ મહામન્ત્રાય નમઃ ।
ૐ મહાયન્ત્રાય નમઃ ।
ૐ મહાવાક્યોપદેશકાય નમઃ ।
ૐ મહાવાક્યાર્થતત્ત્વજ્ઞાય નમઃ ।
ૐ મહામોહનિવારકાય નમઃ ।
ૐ માયાવિને નમઃ ॥ ૫૫૦
ૐ માનદાય નમઃ ।
ૐ માનિને નમઃ ।
ૐ માતૃમુક્તિવિધાયકાય નમઃ ।
ૐ માનાવમાનસામ્યાત્મને નમઃ ।
ૐ માલૂરાધસ્તપસ્સ્થિતાય નમઃ ।
ૐ મધૂકદ્રુતલસ્થાયિને નમઃ ।
ૐ માતૃમતે નમઃ ।
ૐ માતૃભક્તિમતે નમઃ ।
ૐ માત્રાલયપ્રતિષ્ઠાત્રે નમઃ ।

ૐ માર્ગિતાય નમઃ ॥

ૐ માર્ગબાન્ધવાય નમઃ ।
ૐ માર્ગણીયાય નમઃ ।
ૐ માર્ગદર્શિને નમઃ ।
ૐ માર્ગશીર્ષકૃતોદયાય નમઃ ।
ૐ માર્ગિતાત્મને નમઃ ।
ૐ માર્ગશૂન્યાય નમઃ ।
ૐ મિતભુજે નમઃ ।
ૐ મિતસઞ્ચરાય નમઃ ।
ૐ મિતસ્વપ્નાવબોધાય નમઃ ।
ૐ મિથ્યાબાહ્યનિરીક્ષકાય નમઃ ॥

ૐ મુનયે નમઃ ।
ૐ મુક્તાય નમઃ ।
ૐ મુક્તિદાયિને નમઃ ।
ૐ મેધાવિને નમઃ ।
ૐ મેધ્યભોજનાય નમઃ ।
ૐ મૌનવ્યાખ્યાનકૃતે નમઃ ।
ૐ મૌનિને નમઃ ।
ૐ મૌનભાષાવિશારદાય નમઃ ।
ૐ મૌનામૌનદ્વયાતીતાય નમઃ ।
ૐ મૌનદાય નમઃ ॥

ૐ મૌનિષુપ્રિયાય નમઃ ।
ૐ યજ્ઞકૃતે નમઃ ।
ૐ યજ્ઞભુજે નમઃ ।
ૐ યજ્ઞાય નમઃ ।
ૐ યજમાનાય નમઃ ।
ૐ યથાર્થવિદે નમઃ ।
ૐ યતાત્મને નમઃ ।
ૐ યતિસમ્પૂજ્યાય નમઃ ।
ૐ યતિપ્રાપ્યાય નમઃ ।
ૐ યશસ્કરાય નમઃ ॥

ૐ યમાદ્યષ્ટાઙ્ગયોગજ્ઞાય નમઃ ।
ૐ યજુશ્શાખિને નમઃ ।
ૐ યતીશ્વરાય નમઃ ।
ૐ યવનાનુગ્રહકરાય નમઃ ।
ૐ યક્ષાય નમઃ ।
ૐ યમનિષૂદનાય નમઃ ।
ૐ યાત્રાવિરહિતાય નમઃ ।
ૐ યાનાનારૂઢાય નમઃ ।
ૐ યાજ્ઞિકપ્રિયાય નમઃ ।
ૐ યાતનાનાશનાય નમઃ ॥ ૬૦૦
ૐ યાચ્ઞાહીનાય નમઃ ।
ૐ યાચિતદાયકાય નમઃ ।
ૐ યુક્તકૃતે નમઃ ।
ૐ યુક્તભુજે નમઃ ।
ૐ યુક્તસ્વપ્નબોધાય નમઃ ।
ૐ યુગાદિકૃતે નમઃ ।
ૐ યોગીશાય નમઃ ।
ૐ યોગપુરુષાય નમઃ ।
ૐ યોગતત્ત્વવિવેચકાય નમઃ ।
ૐ યોગાસનાય નમઃ ॥

ૐ યોગભૂમિસમારોહણસાધકાય નમઃ ।
ૐ યોગિગમ્યાય નમઃ ।
ૐ યોગફલાય નમઃ ।
ૐ યોગભ્રષ્ટશુભપ્રદાય નમઃ ।
ૐ યોગપ્રશંસિને નમઃ ।
ૐ યોગસ્થાય નમઃ ।
ૐ યોગક્ષેમધુરન્ધરાય નમઃ ।
ૐ રક્ષકાય નમઃ ।
ૐ રમણાય નમઃ ।
ૐ રમ્યાય નમઃ ॥

ૐ રમણીયાઙ્ગસંહતયે નમઃ ।
ૐ રમેશક્લેશસન્દૃષ્ટ જ્યોતિરક્લેશદર્શનાય નમઃ ।
ૐ રજોપહાય નમઃ ।
ૐ રજોમૂર્તયે નમઃ ।
ૐ રસિકાય નમઃ ।
ૐ રસશેવધયે નમઃ ।
ૐ રહસ્યાય નમઃ ।
ૐ રઞ્જનાય નમઃ ।
ૐ રસ્યાય નમઃ ।
ૐ રત્નગર્ભાય નમઃ ॥

ૐ રસોદયાય નમઃ ।
ૐ રાજવિદ્યાગુરવે નમઃ ।
ૐ રાજવિદ્યાવિદે નમઃ ।
ૐ રાજમાનિતાય નમઃ ।
ૐ રાજસાહારનિર્મુક્તાય નમઃ ।
ૐ રાજસજ્ઞાનદૂરગાય નમઃ ।
ૐ રાગદ્વેષવિનિર્મુક્તાય નમઃ ।
ૐ રસાલાશ્રમકોકિલાય નમઃ ।
ૐ રામાભિરામાય નમઃ ।
ૐ રાજશ્રિયે નમઃ ॥

ૐ રાજ્ઞે નમઃ ।
ૐ રાજ્યહિતઙ્કરાય નમઃ ।
ૐ રાજભોગપ્રદાય નમઃ ।
ૐ રાષ્ટ્રભાષાવિદે નમઃ ।
ૐ રાજવલ્લભાય નમઃ ।
ૐ રુદિતદ્વેષણાય નમઃ ।
ૐ રુદ્રાય નમઃ ।
ૐ લક્ષ્મીવતે નમઃ ।
ૐ લક્ષ્મીવર્ધનાય નમઃ ।
ૐ લજ્જાલવે નમઃ ॥ ૬૫૦
ૐ લલિતાય નમઃ ।

ૐ લબ્ધલબ્ધવ્યાય નમઃ ।
ૐ લઘુસિદ્ધિદાય નમઃ ।
ૐ લયવિદે નમઃ ।
ૐ લબ્ધકામૌઘાય નમઃ ।
ૐ લાભાલાભસમાશયાય નમઃ ।
ૐ લયાધિષ્ઠાનતત્ત્વજ્ઞાય નમઃ ।
ૐ લયપૂર્વસમાધિમતે નમઃ ।
ૐ લાસ્યપ્રિયાય નમઃ ।
ૐ લિઙ્ગરૂપિણે નમઃ ॥

ૐ લિઙ્ગોત્થાય નમઃ ।
ૐ લિઙ્ગવર્જિતાય નમઃ ।
ૐ લિપિલેખચણાય નમઃ ।
ૐ લોકશિક્ષકાય નમઃ ।
ૐ લોકરક્ષકાય નમઃ ।
ૐ લોકાયતમતાભિજ્ઞાય નમઃ ।
ૐ લોકવાર્તાવિવર્જિતાય નમઃ ।
ૐ લોકોદાસીનભાવસ્થાય નમઃ ।
ૐ લોકોત્તરગુણોત્તરાય નમઃ ।
ૐ લોકાધ્યક્ષાય નમઃ ।
ૐ લોકપૂજ્યાય નમઃ ।
ૐ લોકાસારત્વબોધકાય નમઃ ।
ૐ લોકાકર્ષણશક્તાત્મશક્તિમત્ કાન્તપર્વતાય નમઃ ।
ૐ લોકાનુત્સાદકાય નમઃ ।
ૐ લોકપ્રમાણાય નમઃ ।
ૐ લોકસઙ્ગ્રહિણે નમઃ ।
ૐ લોકબોધપ્રકાશાર્થ શોણોદ્યજ્જ્ઞાનભાસ્કરાય નમઃ ।
ૐ વરિષ્ઠાય નમઃ ।
ૐ વરદાય નમઃ ।
ૐ વક્ત્રે નમઃ ।
ૐ વઙ્ગદેશ્ય જનાશ્રયાય નમઃ ।
ૐ વન્દારુજનમન્દારાય નમઃ ।

ॐ વર્તમાનૈકકાલવિદે નમઃ ।
ॐ વનવાસરસાભિજ્ઞાય નમઃ ।
ॐ વલિત્રયવિભૂષિતાય નમઃ ।
ॐ વસુમતે નમઃ ।
ॐ વસ્તુતત્ત્વજ્ઞાય નમઃ ।
ॐ વન્દ્યાય નમઃ ।
ॐ વત્સતરીપ્રિયાય નમઃ ।
ॐ વર્ણાશ્રમપરિત્રાત્રે નમઃ ॥

ॐ વર્ણાશ્રમમતાતિગાય નમઃ ।
ॐ વાક્યજ્ઞાય નમઃ ।
ॐ વાક્યકુશલાય નમઃ ।
ॐ વાઙ્મનોબુદ્ધ્યગોચરાય નમઃ ।
ॐ વાદ્યગીતપ્રિયાય નમઃ ।
ॐ વાજશ્રવસે નમઃ ।
ॐ વાપીપ્રતિષ્ઠકાય નમઃ ।
ॐ વાહનાગારનિષ્ઠાવતે નમઃ ।
ॐ વાજિમેધફલપ્રદાય નમઃ ।
ॐ વક્ષોદક્ષિણભાગસ્થ હૃદયસ્થાનદર્શકાય નમઃ ॥ ૭૦૦
ॐ વચદ્ભૂમન્ત્રસંસેવ્યાય નમઃ ।
ॐ વિચારૈકોપદેશકૃતે નમઃ ।
ॐ વિચારમાત્રનિરતાય નમઃ ।
ॐ વિવેકિજનતાદૃતાય નમઃ ।
ॐ વિદિતાત્મને નમઃ ।
ॐ વિધેયાત્મને નમઃ ।
ॐ વિસ્મિતેશાદિવીક્ષિતાય નમઃ ।
ॐ વિરૂપાક્ષગુહાવાસિને નમઃ ।
ॐ વિશ્વાત્મને નમઃ ।
ॐ વિશ્વભુજે નમઃ ।
ॐ વિભવે નમઃ ।
ॐ વિવિક્તસેવિને નમઃ ।
ॐ વિઘ્નેશચૈત્યપ્રાકારસંસ્થિતાય નમઃ ।

ॐ વિધ્યદૃષ્ટમહોદર્શિને નમઃ ।
ॐ વિજ્ઞાનાનન્દસુન્દરાય નમઃ ।
ॐ વિઘસાશિને નમઃ ।
ॐ વિશુદ્ધાત્મને નમઃ ।
ॐ વિપર્યાસનિરાસકાય નમઃ ।
ॐ વિભૂતિસિતફાલાઢ્યાય નમઃ ।
ॐ વિરોધોક્તિવિનાકૃતાય નમઃ ।
ॐ વિશ્વમ્ભરાય નમઃ ।
ॐ વિશ્વવૈદ્યાય નમઃ ।
ॐ વિશ્વાસ્યાય નમઃ ।
ॐ વિસ્મયાન્વિતાય નમઃ ।
ॐ વીણાગેયાય નમઃ ।
ॐ વીતમાયાય નમઃ ।
ॐ વીર્યવતે નમઃ ।
ॐ વીતસંશયાય નમઃ ।
ॐ વૃદ્ધિહ્રાસવિનાભૂતાય નમઃ ।
ॐ વૃદ્ધાય નમઃ ॥

ॐ વૃત્તિનિરોધકાય નમઃ ।
ॐ વૃત્તિદાય નમઃ ।
ॐ વૃત્તિબોધેદ્ધાય નમઃ ।
ॐ વેણુવાદ્યવશંવદાય નમઃ ।
ॐ વેદવેદાન્તતત્ત્વજ્ઞાય નમઃ ।
ॐ વેષદોષપ્રકાશકાય નમઃ ।
ॐ વ્યક્તાવ્યક્તસ્વરૂપજ્ઞાય નમઃ ।
ॐ વ્યઙ્ગ્યવાક્યપ્રયોગવિદે નમઃ ।
ॐ વ્યાપ્તાખિલાય નમઃ ।
ॐ વ્યવસ્થાકૃતે નમઃ ॥

ॐ વ્યવસાયવિબોધકાય નમઃ ।
ॐ વૈજ્ઞાનિકાગ્રણ્યૈ નમઃ ।
ॐ વૈશ્વાનરાય નમઃ ।
ॐ વ્યાઘ્રાજિનસ્થિતાય નમઃ ।

ૐ શરણ્યાય નમઃ ।
ૐ શર્મદાય નમઃ ।
ૐ શક્તિપાતબુદ્ધાય નમઃ ।
ૐ શમાન્વિતાય નમઃ ।
ૐ શરીરવદ્ભાસમાનાય નમઃ ।
ૐ શર્મણ્યજનવન્દિતાય નમઃ ॥ ૭૫૦
ૐ શાસ્ત્રજાલમહારણ્યવૃથાટનનિષેધકાય નમઃ ।
ૐ શાસ્ત્રાભ્યાસફલીભૂતજ્ઞાનવિજ્ઞાનતત્પરાય નમઃ ।
ૐ શાસ્ત્રોલ્લઙ્ઘનવિદ્વેષિણે નમઃ ।
ૐ શાસ્ત્રમાર્ગાવિલઙ્ઘનાય નમઃ ।
ૐ શાન્તાત્મને નમઃ ।
ૐ શાન્તિદાય નમઃ ।
ૐ શાન્તિધનાય નમઃ ।
ૐ શાન્તોપદેશકાય નમઃ ।
ૐ શાણ્ડિલ્યોપાસ્તિલક્ષ્યાર્થાય નમઃ ।
ૐ શાસ્ત્રયોનયે નમઃ ॥

ૐ પ્રજાપતયે નમઃ ।
ૐ શિવઙ્કરાય નમઃ ।
ૐ શિવતમાય નમઃ ।
ૐ શિષ્ટેષ્ટાય નમઃ ।
ૐ શિષ્ટપૂજિતાય નમઃ ।
ૐ શિવપ્રકાશસન્તુષ્ટાય નમઃ ।
ૐ શિવાદ્વૈતપ્રતિષ્ઠિતાય નમઃ ।
ૐ શિવગઙ્ગાતતાકસ્થાય નમઃ ।
ૐ શિવજ્ઞાનપ્રદાયકાય નમઃ ।
ૐ શીતાચલપ્રાન્ત્યપૂજ્યાય નમઃ ॥

ૐ શીપ્રાતીરજનાશ્રયાય નમઃ ।
ૐ શુભાશુભપરિત્યાગિને નમઃ ।
ૐ શુભાશુભવિમત્સરાય નમઃ ।
ૐ શુક્લકૃષ્ણગતિજ્ઞાનિને નમઃ ।
ૐ શુભંયવે નમઃ ।

ૐ શિશિરાત્મકાય નમઃ ।
ૐ શુકવત્ જન્મસંસિદ્ધાય નમઃ ।
ૐ શેષાદ્રિસ્વામિવત્સલાય નમઃ ।
ૐ શૈવવૈષ્ણવશાક્તાદિ વિરોધપ્રતિરોધકાય નમઃ ।
ૐ શૃઙ્ગારાદિ રસાલમ્બાય નમઃ ॥

ૐ શૃઙ્ગારરસવિપ્રિયાય નમઃ ।
ૐ શ્રવણાદ્યર્થતત્ત્વજ્ઞાય નમઃ ।
ૐ શ્રવણાનન્દભાષિતાય નમઃ ।
ૐ શોણેશાલયસઞ્ચારિણે નમઃ ।
ૐ શોણેશાય નમઃ ।
ૐ શોણતીર્થવિદે નમઃ ।
ૐ શોકમોહાદ્યસંસ્પૃષ્ટાય નમઃ ।
ૐ શોણક્ષેત્રાધિદૈવતાય નમઃ ।
ૐ શ્રીદાય નમઃ ।
ૐ શ્રીશાય નમઃ ॥

ૐ શ્રીનિવાસાય નમઃ ।
ૐ શ્રીકણ્ઠમતતત્ત્વવિદે નમઃ ।
ૐ શ્રીવિદ્યામન્ત્રતત્ત્વજ્ઞાય નમઃ ।
ૐ શ્રીવૈષ્ણવમતપ્રિયાય નમઃ ।
ૐ શ્રુતિતાત્પર્યનિર્વક્ત્રે નમઃ ।
ૐ શ્રુતમાત્રાવધારણાય નમઃ ।
ૐ શ્રુતશ્રોતવ્યસન્તુષ્ટાય નમઃ ।
ૐ શ્રૌતમાર્ગસમર્થકાય નમઃ ।
ૐ ષડધ્વધ્વાન્તવિધ્વંસિને નમઃ ।
ૐ ષડૂર્મિભયભઞ્જનાય નમઃ ॥ ૮૦૦
ૐ ષડ્ગ્રન્થિભેદચતુરાય નમઃ ।
ૐ ષડ્ગુણિને નમઃ ।
ૐ ષટ્પ્રમાણવતે નમઃ ।
ૐ ષટ્કોણમધ્યનિલયાય નમઃ ।
ૐ ષડરિઘ્નાય નમઃ ।
ૐ ષડાશ્રયાય નમઃ ।

ॐ ષણ્ડત્વઘ્નાય નમઃ ।

ॐ ષડાધારનિર્ધ્યાતાય નમઃ ।

ॐ ષડાનાદિવિદે નમઃ ।

ॐ સર્વજ્ઞાય નમઃ ॥

ॐ સર્વવિદે નમઃ ।

ॐ સર્વાય નમઃ ।

ॐ સાર્વાય નમઃ ।

ॐ સર્વમનસ્સ્થિતાય નમઃ ।

ॐ સદસત્ નિર્ણયજ્ઞાનિને નમઃ ।

ॐ સર્વભૂતસમાશયાય નમઃ ।

ॐ સર્વશ્રુતયે નમઃ ।

ॐ સર્વચક્ષુષે નમઃ ।

ॐ સર્વાનનકરાદિમતે નમઃ ।

ॐ સર્વેન્દ્રિયગુણાભાસાય નમઃ ॥

ॐ સર્વસમ્બન્ધવર્જિતાય નમઃ ।

ॐ સર્વભૃતે નમઃ ।

ॐ સર્વકૃતે નમઃ ।

ॐ સર્વહરાય નમઃ ।

ॐ સર્વહિતેરતાય નમઃ ।

ॐ સર્વારમ્ભપરિત્યાગિને નમઃ ।

ॐ સગુણધ્યાયિતારકાય નમઃ ।

ॐ સર્વભૂતનિશાબુદ્ધાય નમઃ ।

ॐ સર્વજાગરનિદ્રિતાય નમઃ ।

ॐ સર્વાશ્ચર્યમયાય નમઃ ॥

ॐ સભ્યાય નમઃ ।

ॐ સઙ્કલ્પઘ્નાય નમઃ ।

ॐ સદાતનાય નમઃ ।

ॐ સર્ગાદિમધ્યનિધનાય નમઃ ।

ॐ સકૃત્સ્મૃતિવિમુક્તિદાય નમઃ ।

ॐ સંયમિને નમઃ ।

ॐ સત્યસન્ધાય નમઃ ।

ૐ સંસ્કાર પરિવર્જિતાય નમઃ ।
ૐ સમાય નમઃ ।
ૐ સમવિભક્તાઙ્ગાય નમઃ ॥

ૐ સમદૃશે નમઃ ।
ૐ સમસંસ્થિતાય નમઃ ।
ૐ સમર્થાય નમઃ ।
ૐ સમરદ્વેષિણે નમઃ ।
ૐ સમર્યાદાય નમઃ ।
ૐ સમાહિતાય નમઃ ।
ૐ સમયજ્ઞાય નમઃ ।
ૐ સદાનન્દાય નમઃ ।
ૐ સમાહૃતનિજેન્દ્રિયાય નમઃ ।
ૐ સત્તાસંવિન્મયજ્યોતિષે નમઃ ॥ ૮૫૦
ૐ સમ્પ્રદાયપ્રવર્તકાય નમઃ ।
ૐ સમસ્તવૃત્તિમૂલાહંવૃત્તિનાશોપદેશકાય નમઃ ।
ૐ સમ્રાજે નમઃ ।
ૐ સમૃદ્ધાય નમઃ ।
ૐ સમ્બુદ્ધાય નમઃ ।
ૐ સર્વશ્રુતિમનોહરાય નમઃ ।
ૐ સરળાય નમઃ ।
ૐ સરસાય નમઃ ।
ૐ સર્વરસાય નમઃ ।
ૐ સર્વાનુભૂતિયુજે નમઃ ॥

ૐ સર્વેશ્વરાય નમઃ ।
ૐ સર્વનિધયે નમઃ ।
ૐ સર્વાત્મને નમઃ ।
ૐ સર્વસાધકાય નમઃ ।
ૐ સહજપ્રાપ્તકર્માનુષ્ઠાનત્યાગનિષેધકાય નમઃ ।
ૐ સહિષ્ણવે નમઃ ।
ૐ સાત્ત્વિકાહારાય નમઃ ।
ૐ સાત્ત્વિકજ્ઞાનિવીક્ષિતાય નમઃ ।

ॐ સત્ત્વાધિકમનોબુદ્ધિસુખધૈર્યવિવર્ધકાય નમઃ ।
ॐ સાત્ત્વિકત્યાગયોગજ્ઞાય નમઃ ॥

ॐ સાત્ત્વિકારાધ્યવૈભવાય નમઃ ।
ॐ સાર્ધષોડશવર્ષાપ્તપારિવ્રાજ્યાય નમઃ ।
ॐ વિરક્તધિયે નમઃ ।
ॐ સામગાનપ્રિયાય નમઃ ।
ॐ સામ્યવૈષમ્યમતિકૃન્તનાય નમઃ ।
ॐ સાધિતાખિલસિદ્ધીશાય નમઃ ।
ॐ સામવિદે નમઃ ।
ॐ સામગાયનાય નમઃ ।
ॐ સિદ્ધાર્થાય નમઃ ।
ॐ સિદ્ધસઙ્કલ્પાય નમઃ ॥

ॐ સિદ્ધિદાય નમઃ ।
ॐ સિદ્ધસાધનાય નમઃ ।
ॐ સિદ્ધ્યસિદ્ધિસમાય નમઃ ।
ॐ સિદ્ધાય નમઃ ।
ॐ સિદ્ધસઙ્ઘસમર્ચિતાય નમઃ ।
ॐ સિસાધયિષુલોકેડ્યાય નમઃ ।
ॐ સહાયામ્બાસહાયવતે નમઃ ।
ॐ સુન્દરાય નમઃ ।
ॐ સુન્દરક્ષેત્રવિદ્યાભ્યાસવિલાસભૃતે નમઃ ।
ॐ સુન્દરેશ્વરલીલાકૃતે નમઃ ॥

ॐ સુન્દરાનન્દવર્ધનાય નમઃ ।
ॐ સુરર્ષિસન્નુતાય નમઃ ।
ॐ સૂક્ષ્માય નમઃ ।
ॐ સૂરિદૃશ્યપદસ્થિતાય નમઃ ।
ॐ સુદર્શનાય નમઃ ।
ॐ સુહૃદે નમઃ ।
ॐ સૂરયે નમઃ ।
ॐ સૂનૃતોક્તિવદાવદાય નમઃ ।
ॐ સૂત્રવિદે નમઃ ।

ૐ સૂત્રકૃતે નમઃ ॥ ૯૦૦
ૐ સૂત્રાય નમઃ ।
ૐ સૃષ્ટિવૈતથ્યબોધકાય નમઃ ।
ૐ સૃષ્ટિવાક્યમહાવાક્યૈક્યકણ્ઠ્યપ્રતિપાદકાય નમઃ ।
ૐ સૃષ્ટિહેતુમનોનાશિને નમઃ ।
ૐ સૃષ્ટ્યધિષ્ઠાનનિષ્ઠિતાય નમઃ ।
ૐ સ્રક્ચન્દનાદિવિષયવિરાગિણે નમઃ ।
ૐ સ્વજનપ્રિયાય નમઃ ।
ૐ સેવાનમ્રસ્વભક્તૌઘસદ્યોમુક્તિપ્રદાયકાય નમઃ ।
ૐ સોમસૂર્યાગ્ન્યપ્રકાશ્યસ્વપ્રકાશસ્વરૂપદૃશે નમઃ ।
ૐ સૌન્દર્યામ્બાતપસ્સમ્પત્પરીપાકફલાયિતાય નમઃ ॥

ૐ સૌહિત્યવિમુખાય નમઃ ।
ૐ સ્કન્દાશ્રમવાસકુતૂહલિને નમઃ ।
ૐ સ્કન્દાલયતપોનિષ્ઠાય નમઃ ।
ૐ સ્તવ્યસ્તાવકવર્જિતાય નમઃ ।
ૐ સહસ્રસ્તમ્ભસંયુક્ત મણ્ડપાન્તરમાશ્રિતાય નમઃ ।
ૐ સ્તૈન્યસ્તેનાય નમઃ ।
ૐ સ્તોત્રશસ્ત્રગેયાય નમઃ ।
ૐ સ્મૃતિકરાય નમઃ ।
ૐ સ્મૃતયે નમઃ ।
ૐ સામરસ્યવિધાનજ્ઞાય નમઃ ॥

ૐ સઙ્ઘસૌભ્રાત્રબોધકાય નમઃ ।
ૐ સ્વભાવભદ્રાય નમઃ ।
ૐ મધ્યસ્થાય નમઃ ।
ૐ સ્ત્રીસન્યાસવિધાયકાય નમઃ ।
ૐ સ્તિમિતોદધિવજ્જ્ઞાનશક્તિપૂરિતવિગ્રહાય નમઃ ।
ૐ સ્વાત્મતત્ત્વસુખસ્ફૂર્તિતુન્દિલસ્વસ્વરૂપકાય નમઃ ।
ૐ સ્વસ્વધર્મરતશ્લાઘિને નમઃ ।
ૐ સ્વભુવે નમઃ ।
ૐ સ્વચ્છન્દચેષ્ટિતાય નમઃ ।
ૐ સ્વસ્વરૂપપરિજ્ઞાનપરામૃતપદસ્થિતાય નમઃ ॥

ૐ સ્વાધ્યાયજ્ઞાનયજ્ઞેજ્યાય નમઃ ।
ૐ સ્વતસ્સિદ્ધસ્વરૂપદૃશે નમઃ ।
ૐ સ્વસ્તિકૃતે નમઃ ।
ૐ સ્વસ્તિભુજે નમઃ ।
ૐ સ્વામિને નમઃ ।
ૐ સ્વાપજાગ્રદ્વિવર્જિતાય નમઃ ।
ૐ હન્તૃહન્તવ્યતાશૂન્યશુદ્ધસ્વાત્મોપદેશકાય નમઃ ।
ૐ હસ્તપાદાદ્યસઙ્ગ્રાહ્યનિર્લિપ્તપરમાર્થદૃશે નમઃ ।
ૐ હત્યાદિપાપશમનાય નમઃ ।
ૐ હાનિવૃદ્ધિવિવર્જિતાય નમઃ ॥

ૐ હિતકૃતે નમઃ ।
ૐ હૂણદેશીયજનવર્ણિત વૈભવાય નમઃ ।
ૐ હૃદયબ્રહ્મતત્ત્વજ્ઞાય નમઃ ।
ૐ હૃદયાન્વેષદેશનાય નમઃ ।
ૐ હૃદયસ્થાય નમઃ ।
ૐ હૃદયાકાશસ્વરૂપિણે નમઃ ।
ૐ હૃદ્ગુહાશયાય નમઃ ।
ૐ હાર્દાકાશાન્તર્ગતબાહ્યાકાશાદિવસ્તુદૃશે નમઃ ।
ૐ હૃદયસ્થાનતત્ત્વજ્ઞાય નમઃ ।
ૐ હૃદહંનાશ પણ્ડિતાય નમઃ ॥ ૯૫૦
ૐ હેયોપાદેયરહિતાય નમઃ ।
ૐ હેમન્તર્તુકૃતોદયાય નમઃ ।
ૐ હરિબ્રહ્મેન્દ્રદુષ્પ્રાપસ્વારાજ્યોર્જિતશાસનાય નમઃ ।
ૐ હતાસુરપ્રકૃતિકાય નમઃ ।
ૐ હંસાય નમઃ ।
ૐ હૃદ્યાય નમઃ ।
ૐ હિરણ્મયાય નમઃ ।
ૐ હાર્દવિદ્યાફલીભૂતાય નમઃ ।
ૐ હાર્દસન્તમસાપહાય નમઃ ।
ૐ સેતવે નમઃ ॥

ૐ સીમ્ને નમઃ ।

ૐ સમુદ્રાય નમઃ ।
ૐ સમાભ્યધિકવર્જિતાય નમઃ ।
ૐ પુરાણાય નમઃ ।
ૐ પુરુષાય નમઃ ।
ૐ પૂર્ણાય નમઃ ।
ૐ અનન્તરૂપાય નમઃ ।
ૐ સનાતનાય નમઃ ।
ૐ જ્યોતિષે નમઃ ।
ૐ પ્રકાશાય નમઃ ॥

ૐ પ્રથિતાય નમઃ ।
ૐ સ્વયંભાનાય નમઃ ।
ૐ સ્વયંપ્રભવે નમઃ ।
ૐ સત્યાય નમઃ ।
ૐ જ્ઞાનાય નમઃ ।
ૐ સુખાય નમઃ ।
ૐ સ્વસ્થાય નમઃ ।
ૐ સ્વાનુભવે નમઃ ।
ૐ પરદૈવતાય નમઃ ।
ૐ મહર્ષયે નમઃ ॥

ૐ મહાગ્રાસાય નમઃ ।
ૐ મહાત્મને નમઃ ।
ૐ ભગવતે નમઃ ।
ૐ વશિને નમઃ ।
ૐ અહમર્થાય નમઃ ।
ૐ અપ્રમેયાત્મને નમઃ ।
ૐ તત્ત્વાય નમઃ ।
ૐ ઉત્તમ નિર્વાણાય નમઃ ।
ૐ અનાખ્યવસ્તુને નમઃ ।
ૐ મુક્તાત્મને નમઃ ।
ૐ બન્ધમુક્તિવિવર્જિતાય નમઃ ।
ૐ અદૃશ્યાય નમઃ ।

ૐ દૃશ્યનેત્રે નમઃ ।

ૐ મૂલાચાર્યાય નમઃ ।

ૐ સુખાસનાય નમઃ ।

ૐ અન્તર્યામિને નમઃ ।

ૐ પારશૂન્યાય નમઃ ।

ૐ ભૂમ્ને નમઃ ।

ૐ ભોજયિત્રે નમઃ ।

ૐ રસાય નમઃ ॥ ૧૦૦૦

ઉપસંહારઃ -
કોઽહં માર્ગ ધનુષ્પાણિઃ નાહં તત્ત્વ સુદર્શનઃ ।
સોઽહં બોધ મહાશઙ્ખો ભગવાન્ રમણોઽવતુ ॥ ૧॥

ઇતિ તે નામસહસ્રં રમણસ્ય મહાત્મનઃ ।
કથિતં કૃપયા દેવિ ગોપ્યાદ્ ગોપ્યતરં મયા ॥ ૨॥

ય ઇદં નામસહસ્રં ભક્ત્યા પઠતિ માનવઃ ।
તસ્ય મુક્તિર્યત્નેન સિધ્યત્યેવ ન સંશયઃ ॥ ૩॥

વિદ્યાર્થી લભતે વિદ્યાં વિવાહાર્થી ગૃહી ભવેત્ ।
વૈરાગ્ય કામો લભતે વૈરાગ્યં ભવતારકમ્ ॥ ૪॥

યેન યેન ચ યો યોઽર્થી સ સ તં તં સમશ્નુતે ।
સર્વ પાપવિનિર્મુક્તઃ પરં નિર્વાણમાપ્નુયાત્ ॥ ૫॥

દુર્દેશ કાલોત્થ દુરામયાર્તાઃ
  દૌર્ભાગ્ય તાપત્રય સન્નિરુદ્ધાઃ ।
નરાઃ પઠન્તો રમણસ્ય નામ
  સાહસ્રમીયુઃ સુખમસ્ત દુઃખમ્ ॥ ૬॥

ઇતિ શ્રી ગૌતમઋષિ પ્રોક્તં
શ્રી રમણસહસ્રનામસ્તોત્રાધાર નામાવલિઃ સમ્પૂર્ણા ॥

॥ શુભમસ્તુ ॥

Encoded and Proofread by Sunder Hattangadi

Proofread by Lingeshwara Rao (from original in Telugu)

Text composed by Shri LakShmanasharmana.
This work is published by Sri Ramanasramam
www.sriramanamaharshi.org
It has been approved to be posted
on sanskritdocuments.org by permission of
Sri V.S. Ramanan, President, Sri Ramanasramam.

*Shri Ramanamaharshi Sahasranamavali*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*